# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ४ | गुणाः - ७० |
|---|---|---|
| विषयः - वास्तुशास्त्रम् | (C.C.- 4.1.3. Old & New ) | |
| दिनाङ्कः - १८/१२/२०१८ | *सन्दर्भग्रन्थः - बृहद्वास्तुमाला* | समयः -२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः एकाकारिका सान्वयं व्याख्यात ।** **( ५ )**

*(१) द्वारशुद्धिं निरीक्ष्यादौ भुशुद्धिं वृषचक्रतः।*
*निष्पञ्चके स्थिरे लग्ने द्वयङ्गे वालयमारभेत्।*

*(२) ईशोच्चं निर्ऋतौ नीचं भूतलं भूतवीथिकम्।*
*आग्नेयोच्चं वायुनीचं नागवीथी प्रशस्यते॥*

**प्रश्नः २** *ग्रामवासे शिवाबलिविधिः ग्रन्थाधारेण स्पष्टयत।* **( १० )**

**( अथवा )**

*शल्योद्धारविधानं सविस्तरं वर्णयत।*

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितयोः एकस्य ससन्दर्भं व्याख्यात ।** **( ५ )**

*(१) दिनमानदले सप्ताङ्गुलच्छायाग्रतो हि यत्।*
*शंकुमूले नीयमानं सूत्रं स्यादुत्तरा दिशा॥*

*(२) सूर्यारवारराश्यंशाः सदा वह्निभयप्रदाः।*
*शेषग्रहाणां वारांशाः कर्तुरिष्टार्थसिद्धिदाः॥*

**प्रश्नः ४** *नारदमते गृहारम्भे मासविचारः वर्णयत।* **( १० )**

**( अथवा )**

*देवालयाद्यारम्भे राहुमुखविचारः दर्शयत।*

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितयोः एकस्य सान्वयं व्याख्यां कुरुत ।** **( ५ )**

*(१) वृषचक्रं वृषाकारं सर्वावयवसंयुतम्।*
*यस्मिन् - ऋक्षे स्थितो भानुस्तत्रादौ त्रीणिमस्तके॥*

*(२) वास्तोः शिरसि पृच्छे च याम्यकुक्षौ च पृष्ठतः।*
*आयुः कामखनेनैव वामकुक्षौ खनिः शुभा॥*

**प्रश्नः ६** *रामदैवज्ञमते वृषवास्तुचक्रं ग्रन्थोक्तदिशा प्रदर्शयत।* **( १० )**

**( अथवा )**

*द्वारस्थापने तिथिविचारः शुभाशुभफलसिहतं दर्शयत।*

**चतुर्थान्वितिः**

**प्रश्नः ७ निम्नलिखितयोः एकस्य सान्वयं व्याख्यात । ( ५ )**

*(१) याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते।*
*उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः ॥*

*(२) जम्बूवृक्षस्य प्राग्वल्मीको यदि भवेत् समीपस्थः।*
*तस्माद्दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु ॥*

**प्रश्नः ८** *वाटिकानिर्माणविधानं ग्रन्थोक्तदिशा स्पष्टयत।* **( १० )**

**( अथवा )**

*शक्तियामलोक्तवृक्षचक्रं ग्रन्थाधारेण दर्शयत।*

**पञ्चमान्वितः**

**प्रश्नः ९ केषाश्चित् दशप्रश्नानामुत्तराणि देयानि । ( १० )**

*(१) नागपृष्ठभूमिं गृहनिर्माणे शुभाशुभं वा ?*
*(२) 'अ' प्रश्ने कस्मिन् दिशायां शल्यं प्राप्यते ?*
*(३) कूर्मचक्रं कस्मिन् कार्ये प्रयुज्यते ?*
*(४) श्रावणमासे गृहारम्भे किं फलम् ?*
*(५) प्रतिपदातिथ्यां गृहनिर्माणे किं फलम् ?*
*(६) हस्तनक्षत्रे गृहारम्भं शुभं भवति न वा ?*
*(७) पूर्णिमा – अमावस्यायां द्वारस्थापने किंफलम् ?*
*(८) पर्जन्यपदोपरि द्वारस्थापने किं फलम् ?*
*(९) धनागारं गृहस्य कस्मिन् दिशायां स्थापनीयम्।*
*(१०) पूर्वाप्लवाभूम्याः फलं किम् ?*
*(११) जलस्थानं गृहस्य कस्मिन् दिशायां स्थापनीयम् ?*
*(१२) आयाः कति ?*
*(१३) ध्वजआयस्य दिशा का ?*
*(१४) वास्तुकर्मणि निन्दितवासराः के ?*
*(१५) अश्वनीनक्षत्रे वृक्षारोपणं कर्तुं शक्यते न वा ?*

--००--